**संस्कृत वार्ता:**

**दिनाङ्क : 11.06.2026** **सायम् - 06:20**

**आदौ मुख्यवार्ता:**

1. ओमान्-देशस्य टैंकर-आक्रमणस्य विषये भारतेन प्रबलं विरोधं प्रकटितम्; एम्. टी. जलवीर-नौकायाः सर्वे कर्मचारिणः सुरक्षिताः इति सूचनास्ति।
2. नीति आयोगस्य सभायां, प्रधानमन्त्रिणा नरेन्द्रमोदिना विकसितभारतस्य कृते कौशलस्य, वृत्त्यावसरस्य च महत्त्वं प्रतिपादितम्।
3. आन्ध्रप्रदेशस्य मद्य-परिवहन-भ्रष्टाचारप्रकरणस्य हैदराबादे ई. डी. - इत्यनेन सहसान्वेषणं कृतम्।
4. भारतेन माल्दीवस्-देशं प्रति खसरा-रोगस्य सूच्यौषधीनां, चिकित्सासहाय्यं प्रेषितम्।

**अपि च,**

5. अद्य रात्रौ बृहत्तमः फ़ीफ़ा-विश्वचषक-क्रीडा आरभ्यते यत्र मेक्सिको दलं दक्षिण-आफ्रिका-दलं सम्मुखी करिष्यति। ।

**अथ वार्ता: विस्तरेण**

**अन्तर्मन्त्रिमण्डलीय सम्मेलनम्**

ओमान्-देशस्य तटे एकस्या: नौकायाः उपरि सद्यः एव कृताक्रमणम् भारतेन निन्दितं यस्मिन् त्रयः भारतीय-नागरिकाः मृताः। नवदिल्ल्याम् अन्तर्मन्त्रिमण्डलीय-वार्ताहर-सम्मेलनम् अभिसंबोधयन्, विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अवदत् यत्, सर्वकारेण अमरीकादेशस्य चार्ज-डी-अफेयर्स् इत्येतान् आहूय प्रबलं विरोधं प्रकटितम् अस्ति इति। सः अस्मिन् प्रदेशे नौकायानस्य उपरि निरन्तरं आक्रमणानि अतीव चिन्तास्पदं वर्णितानि तथा च शान्तिं स्थिरतां च पुनः स्थापयितुं संवादस्य कूटनीतेः च आह्वानम् अपि अकरोत्।

गल्फ-क्षेत्रस्य अपरसचिवः असीम् आर्. महाजनः अवदत् यत्, सर्वकारः पश्चिम-एशिया-क्षेत्रस्य स्थितिं निकटतया निरीक्षमाणः अस्ति, भारतीयाभियानेन च अहोरात्रम् सहायता-सेवाः अपि आरब्धवन्तः। सः अवदत् यत् अस्मिन् मासे अष्टदिनाङ्के ओमान-देशस्य समीपे लक्षिताः एम. टी. मारिवेक्स-नौकायाः सर्वे चतुर्विंशति: भारतीयाः कर्मचारिणः सुरक्षिततया रक्षिताः सन्ति, ते शीघ्रमेव स्वदेशं प्रत्यागमिष्यन्ति इत्यपेक्षा अस्ति। पत्तन-नौवहन-जलमार्ग-मन्त्रालयस्य अपरसचिवः मुकेश मङ्गलः अवदत् यत् मृतानां नाविकानां परिवारान् सीमेन्-वेल्फेयर्-फण्ड्-सोसाईटी इत्यस्य माध्यमेन प्रत्येकस्मै दशलक्षरूप्यकाणां अनुग्रहराशिः प्रदीयते। सः अग्रे सूचितवान् यत् अद्य ओमान-देशस्य शिनास-पत्तनस्य समीपे समुद्रीय-सुरक्षा-घटनायां संलग्नाः गिनी-बिसाऊ इत्यस्य

ध्वजेन युक्तः एम्. टी. जलवीर इत्यस्मिन् स्थिताः सर्वेपि विंशति: भारतीय-कर्मचारिणः सुरक्षिताः सन्ति, निर्वासनप्रयासाः च प्रचलन्ति। अत्रान्तरे, देशे उर्वरकस्य, इन्धनस्य च आपूर्तिः स्थिरा अस्ति इति प्रशासनेन आश्वासितम्। उर्वरकविभागस्य अपरसचिवा अपर्णा एस्. शर्मा इत्येषा अवोचत् यत् पर्याप्तानि भण्डाराणि उपलभ्यन्ते, अनेकदेशैः आयातः च सुनिश्चित: अस्ति। पेट्रोलियम-प्राकृतिकेन्धन-मन्त्रालयस्य संयुक्तसचिवा सुजाता शर्मा इत्येषा अकथयत् यत् आन्तरिक-शोधनागाराणि उच्चक्षमतया कार्यं कुर्वन्ति। अशोधिततैलस्य, पेट्रोल् इत्यस्य, डीज़ल् इत्यस्य, एल्. पी. जी. इत्यस्य, प्राकृतिकेन्धन इत्यस्य च आपूर्तिः अप्रभाविता अस्ति इति सा अवोचत्।

**प्रधानमन्त्री नीति-आयोग:**

प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् साम्प्रतं विश्वं अनिश्चितताया:, अस्थिरतायाश्च कालं अनुभवति। परं भारतदेश: आत्मविश्वासेन दृढ़संकल्पेन च अग्रेसरति। नवदिल्ल्यां राष्ट्रपति भवने नीति-आयोगस्य दशम-शासक-परिषद: अध्यक्षतां कुर्वन् स: अकथयत् यत् यथा-यथा भारतं विकसितभारतस्य लक्ष्यस्य समीपं गच्छति तथा-तथा केन्द्र-राज्य-सर्वकारयो: उत्तरदायित्वं वर्धयन्ति । तेन भणितं यत् राज्येषु पारस्परिक सहयोग:, संवाद:, विचाराणम् आदान-प्रदानं आवश्यकं भवेत्। विषयेऽस्मिन् नीत्यायोग: महत्वपूर्णां भूमिकां निर्वाहयति।

नीति-आयोगस्य सहयोगेन सर्वेषां राज्याणां केन्द्र शासित प्रदेशानां च मध्ये विचार-विनिमय: सम्यक् भवेत् विकसित भारतस्य लक्ष्यम्प्रति बलमपि वर्धिष्यति । सभायामस्यां देशे कौशलविकासस्य संवर्धनं, वृत्यवसराणि अपि वर्धिष्यन्ति। वर्षस्य अस्य विषयो विद्यते- **सप्त चत्वारिंशदुत्तर-द्वि-सहस्रतम् वर्षपर्यन्तं विकसित भारताय समावेशी मानवविकास:**।

**प्रवर्तननिदेशालय:**

प्रवर्तननिदेशालयेन आन्ध्र-प्रदेश-राज्य-मद्य पदार्थ निगम - लिमिटेड् इत्यस्य कथिते परिवहन-प्रवञ्चना-काण्डे हैदराबादे पञ्चस्थलेषु सहसान्वेषणं कृतम्। प्रवर्तननिदेशालयस्य अधिकारिण: कथयन्ति यत् आरोपिजना: शासकीय-कोषात् पञ्चनवत्यधिक-कोटि-रूप्यकाणां वित्तहरणं कृतवन्त: । तथा च स्व-सहयोगिनां कृते अवैधलाभा: अर्जिता: ।

**भारत-मालदीव-सुच्यौषधी**

भारतेन, प्रतिरक्षण-व्याप्तिं सुदृढं कर्तुं, सार्वजनिक-स्वास्थ्यस्य रक्षणार्थं च प्रयत्नान् समर्थयितुं माल्दीवस्-देशं प्रति विंशति सहस्रं यावत् खसरा सुच्यौषधीनां, प्रायः त्रिणि-टन्-चिकित्सा-सामग्रीं च प्रेषितम्। विदेशमन्त्रालयः अवदत् यत् एतत् सहयोगं द्वीपराष्ट्रे वर्धमानानां खसरा-प्रकरणानां निवारणे साहाय्यं करिष्यति तथा च माल्दीवस्-सर्वकारस्य प्रतिक्रिया-उपायान् सुदृढं करिष्यति इति। तस्य 'नेबर्हुड् फ़र्स्ट्', विजन-महासागर इत्येतयोः अन्तर्गतं, भारतं माल्दीवस्-देशेन सह संयुक्तप्राथमिकतासु निकटतया कार्यं कर्तुं प्रतिबद्धम् अस्ति।

## अश्विनी-वैष्णवः - जयपुरः

सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः अद्य राजस्थाने जैसलमेर-जनपदे रामगढ़े विंशतिः किलोवाट्-क्षमतायुक्तस्य एफएम प्रेषकस्य आभासीय उद्घाटनं अकरोत्। जयपुरस्थे आकाशवाणी परिसरे समायोजिते एकस्मिन् कार्यक्रमे उद्घाटनकार्यमिदं सम्पन्नम्। अनेन सह राज्ये एफएम प्रेषकाणां संख्या विवर्ध्य ऊनचत्वारिंशत् जाता। नूतनः प्रेषकः सीमावर्ति-क्षेत्रेषु अशीतिः किलोमीटर-परिमिते क्षेत्र रेडियो-प्रसारणस्य आवरणं प्रदास्यति। एतेन जनाः विविधाः सूचनाः, शैक्षिक – सामग्रयः प्राप्तुं शक्नुवन्ति। सभां सम्बोधयन् श्रीवैष्णवः अवदत् यत् देशस्य सीमाक्षेत्रेषु कश्मीरतः कच्छपर्यन्तम्, आकाशवाणी – दूरदर्शनयोः प्रसारण-सेवायाः विशिष्टाः लाभाः प्राप्तस्यन्ते।

## सर्वोच्च-न्यायालयः

गृहकार्यस्य अधिक-मान्यतां प्रदातुं सम्प्रवर्तिते एकस्मिन् ऐतिहासिके निर्णये भारतीय सर्वोच्च-न्यायालयेन अद्य निर्णयः स्वीकृतः यत् गृहिण्यः स्व-कुटुम्बानां भविष्य-चरित्रनिर्माणे च महत्वपूर्णां भूमिकां निर्वहन्ति। अतः ताः **राष्ट्रनिर्मात्रि** इत्यनेन सम्मानेन सम्मानिताः।

न्यायालयेन प्रतिपादितं यत् गृहव्यवस्थापनं कुर्वत्यः महिलाः केवलं **गृहिण्यः** इति न कथनीयाः, यतोहि शब्दोऽयं समाजे तासां योगदानं न्यूनं करोति।

## पेट्रोल-उत्पाद-शुल्कः

प्रशासनेन एथेनॉल-मिश्रित-पेट्रोल-उत्पाद-शुल्कं अपसारितम्। वित्तमन्त्रालयेन एकया अधिसूचनया प्रकाशितं यत् द्वविंशति-तः त्रिंशत् प्रतिशतन्मितम् एथेनॉल-मिश्रित-पेट्रोल-उत्पादं केन्द्रीय-उत्पाद-शुल्क श्रेण्यात् पूर्णतया विमुक्तम्। मन्त्रालयेन उक्तं यत् अस्य शैथिल्यस्य उद्देश्यं भारतीय एथेनॉल मिश्रण कार्यक्रमं सुदृढ़ीकरणमस्ति।

## फ़ीफ़ा-विश्वचषक-क्रीडायाः

षड्विंशत्यधिक द्विसहस्र तम वर्षस्य फ़ीफ़ा-विश्वचषक-क्रीडायाः आरम्भः अद्य रात्रौ मेक्सिको-नगरस्य ऐतिहासिके एस्टाडियो-एज़्टेका-क्रीडागृहे आरभ्यते। उद्घाटने ग्रुप्-ए-स्पर्धायां आतिथेयः मैक्सिको-देशः भारतीय-मानक-समये रात्रौ सार्द्ध द्वादशवादने दक्षिण-आफ्रिका-देशेन सह क्रीडिष्यति। एतत् इतिहासस्य बृहत्तमं विश्वकप् क्रीडा भविष्यति, यत्र सम्पूर्णे अमेरिका-केनडा-मेक्सिको-देशेषु अष्टचत्वारिंशत्दलानि, चतुरोत्तरैकशत स्पर्धाः च भवन्ति। ऊनविंशति जुलाई दिनाङ्के अन्तिमस्पर्धया सह प्रतियोगिता समाप्यते। अद्यावधि केवलं अष्टदेशाः एव फ़ीफ़ा-विश्वकप विजितवन्तः।

**॥ इति वार्ताः ॥**